752

Shree Raghunath Sanskrit Research Institute Library,
Jammu

No. ७५२ - घ

Title श्रीरामकृष्णकाव्यम् सटीकम्

Author सूर्यदैवज्ञ

Extent १५ Age

Subject काव्यम् सम्पूर्णम्

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नं० ६५२-घ

रामकृष्णकाव्यम् सटीकम् (काव्यम्)

नं० ७५२-घ

पत्राणि

२५ पत्रे

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

अश्वंस्नातंगजंमत्तंवृषभंकाममोहितं।शूद्रमक्षरसंयुक्तंदूरतःपरिवर्जयेत्।

रामकृष्णकाव्यंसटीकंपत्र१५

सं० ६५२ पी
रामकृष्णकाव्यं सटीकम्
पत्र १५
पूर्ण
१५ पत्रे
CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ॐ॰ गैं स्वस्ति श्रीगणेशाय नमः श्रीमन्मङ्गलमूर्त्तिमार्त्तिशमनं नत्वाविदित्वाततः शब्दब्र
श्री॰ ह्ममनोहरं सुगणकज्ञानाधिराज्ञात्मकः यद्ग्रन्थाध्ययनेविनेयनिवहोप्याचार्यच
१ र्यामगात्सोयं सूर्यकविर्विलोमरचनं काव्यं करोत्यद्भुतं १ छन्दःस्वरणमनुक्रमक्रम
विधौसाकांतनानन्यदेष्टारम्भाद्यरितक्रमोसुभयथ्यं तत्रयद्दुर्लभं पर्वसत्यापिमतम् त्ये ४
गल्ह५ तिः किंयद्यपि प्राप्यमालंबते तत्सर्वं गुणिनः त्वमेव यदहो यूयं समस्ताः स्वयं २ कदा
चिदपिसंनतैन्कृतिपरीतेनरोनौरथिकं कथंचिदपि धावति सुस्वरधामधाराध्वनि सूतेनपु
तिविशारदाप्रचुरसाँरदानुग्रहं विलोमकविताकृतौ सुकवितीरथीरामभवत् ३ भागी
रथीरामकथातिरम्यकालिंदिकाहूलकथामनोज्ञा सरस्वतीसूर्यकवेस्त्रतीयात्स्ना
तप्रयागेत्रमतिःकवीनां ४ समाक्षरांघ्रिर्विषमाक्षरांघ्रिर्द्वेधाभवेद्व्यूलकवित्वसीमा
समानभिन्नार्थतयाद्विधाद्याभिन्नाक्षरार्थेनभवेद्द्वितीया ५ अथचित्रकवित्वपरिभाषा
पिंगलादिनाकथिता अध्याहारोयमदोवाक्रियायाः पादाग्रेनेवाविसर्गोविसर्गः कु
त्राप्यूह्यालक्षणाव्यंजनावाविंद्यादेतांश्चित्रकाव्यानुपूर्वम् ६ नैकाक्षरं निंद्ययुक्तिर्नौ १

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

प्रसिद्धाभिधानकं नचसाकारसंश्लिष्टंद्वात्तापातोत्रकेवलं ७॥ अथययोःकथाप्रसंग
स्तांविवक्षेष्टदेवतात्वेनप्रणमति॥ नमिति नंभूरुहतामुक्तिंवन्देभूरुहतायासीतायामुक्तिर्मो
क्षणंयस्मात्सतथा रावणरहितायास्सीतायामुक्तिर्यस्मात्तंरामंवंदेनमस्करोमीत्यर्थः किं
भूतंउदारहासंउदारोहासोयस्यासौतथा उद्धगतिमित्रमपिप्रनुहित्र[illegible]इत्यर्थः पुनःकिंभू
तं भव्यभवंभव्यःपवित्रोवतारोयस्यसतथा अथतंकथंयतःदयाश्रीश्चवभूवदयाभूतव्हपाश्रीः
शोभातयोर्निदानमित्यर्थः अथहत्स्वपदेतेश्रीयादववन्देकिंभूतंभव्यभतोयदेवं भव्याउत्तमा
नंभूरुहतामुक्तिमुदारहासंवन्देयतोभव्यभवंदयाश्रीः श्रीयादवंभव्यभतोयदेवंसंहार
भादीप्तिर्यस्यासौसूर्यःतथातोयप्रोहेन दामुक्तिमुतास्तभूतं॥१॥ चन्द्रःजलात्मकत्वात्तयोर्दी
तनादेवःसूर्यचंद्रयोरपिप्रकाशकरइत्यर्थः तदुक्तंयदादित्यगतंतेजोजगद्भासयतेखिलं य
च्चंद्रमसियच्चाग्नावित्यादि अथकिंभूतंयादवंसहारदामुक्तिंसंहारंमुक्तिंददातीतिसंहारदासंहा
रेणेत्यर्थः तददातितथाविधाहृतनातस्यामुक्तिर्मोक्षणंयस्मात्सतथा पुनःकिंभूतंउतप्रसूतमस
भूतंसर्वप्रमाणरूपेणाव्यवस्थितमित्यर्थः अथवाप्राणानजीवनंतद्रूपंचैतन्यस्वरूपं तदुक्तं श्रद्

मांगाकेशसर्वभूतेशाप्रस्थितः इत्यादि
त्मा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

श्री॰ स्तनायैमुक्तिं दातुं अन्तर्यामित्वेन स्वयमेव तस्येश्वरकोभूदित्युक्तं ॥ ननु देहवतोपि रामादेः कथ
रा॰ मन्तर्यामित्वमित्याशंकातल्याहरोपेंद्रवज्रयाह विरंचिर्ब्रह्माद्विपरार्द्धवृमानेयावत् सर्वभू
तापेक्षया चिरं तिष्ठतीति यथा परंतु आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोर्जुनेति श्रवणान्न वि
२ रंविरंचिरितिज्ञायते तस्यायुषः परिमितत्वात् अथ सा साकारतासत्यसतारकास्तिसेति तच्छ्र
2 हेन रामस्य या साकारता सा सत्यसतारकाः तारकेण सह वर्तमाना सतारका सत्या सती सतारका

चिरंविरंचिर्न चिरंविरंचिः साकारतासत्यसतारकासा साकारतासत्यसतारकासा
चिरंविरंचिर्न चिरंविरंचिः २॥

सत्यसतारका सत्यमबाधितं विज्ञानमयं तारकं यद्ब्रह्म तद्रूपेत्यर्थः अथ कस्यापि त्वेतु सा साकार
तास्मत्यसतारकास्ति याहृत्स्वरूपिणी साकारता सा सती सर्वदैव वर्तमानानि त्येत्यर्थः किंभूता
असतारका तारकाभिः सह वर्तमाने सतारकं व्योम तत्र न विद्यते यस्याः सा असतारका व्योमापि यस्याली
यते इतः परं नित्यत्वं किं वर्णनीयमित्यर्थः चिरंविरंचिरित्यादि पूर्ववत् ॥ २ ॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

अथ रामकृष्णाभ्यां यामायामवष्टभ्य साकारता स्वीकृता तस्याः स्वरूपं समासान्तरपादद्वयोद्धतयाह
असति सत्यसीमता तामसीति असति शुक्तिकारजतवदसत्ये प्रपंचे सत्यसीमता सत्यत्वमर्यादता
मायेति अथास्यास्सत्त्वकार्यवशाद्दन्भूयते इत्याह माययेति ययाहता मालक्ष्मी अपमानवि
घातयमो नियमो यस्याः सा तथा योग्ये योग्ये वा कुत्र स्यात् तत्व किं यत्कालं चेति लक्षणभंगुरायाल क्ष्म्या
नियमो नास्ति उत्तरलक्षणो वादर्शनाद्ब्रह्मस्वरूपते त्यर्थः किंभूतया यया असमसमत्तया नत्तम असत

तामसीत्यसति सत्यसीमता माययाह्यसमसमत्तयायमा माययाह्यसमसमत्तयायमा
तामसीत्यसति सत्यसीमता ३॥

मसमत्त्वं यस्याः सा तथा तस्या मायायाः स्वरूपे विचार्यमाणे असति समत्वं न प्राप्नोति प्रेक्षमाणे वन्नश्य
तीत्युक्तत्वात् यतः परमात्मा ज्ञानरूपः माया त्वज्ञानरूपस्तत्कथं ब्रह्मसमत्तां याति यतो ज्ञानमसत्त्वं
नस्य द्योतकमित्यर्थः ॥ एवमुभयथापि समं इति समासान्तरयाभेदद्वयं ॥३॥ एवमविद्यायाः स्वरूपं
निरूप्येदानीं विद्या विद्यास्वरूपं विषमासान्तरयाश्रालिन्याह ॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

श्री॰
ए॰
३
3

अत्र विविधसंसारतापघ्नी कास्तीति विचार्यमाणे त्रेधा विद्यास्ति त्रिप्रकारा त्रेधाऽहंग्रहपञ्च: सामात्मिका
ननु न हि कर्मकाण्डे विद्याशब्दव्यपदेशः विद्यां चाविद्यां च यस्तद्वेदोभयं सहेत्युक्तत्वात् इत्याशंक्याह ॥
किंभूता त्रेधा विद्या तारका या तारकं परंब्रह्म श्रीरामाख्यं ग्राह्यं छत्वान्निरूपणीयत्वेन प्राप्तं यस्यास्सा तथा
उपनिषद्विद्यात्मिकेत्यर्थः पुनः किंभूता विपापा या विगतपापमज्ञानं यया सा तथा अत एव सा पापप्र
णाशकत्वेन दृष्टान्तमाह नोऽस्मत्कृत्यमिति नितरां वासो यस्मिंस्तन्निवासः शीतलच्छायाद्युपस्कृतं गृहं
तस्मिन्नुस्मत्कृत्यसंतापभयं नास्ति तद्वदेतदर्थपरिशीलनेन त्रिविधतापोन्मूलनमित्यर्थः कृष्णपदे
अथ कृष्णभक्तिमहत्त्वेनैव विद्याज्ञाननाशकत्रीत्याह विद्यात्रैनुष्टान्निर्जेतायब्रह्मणो कृष्णेनाद्यानि
कान्तापघ्नी तारका या विपापा त्रेधा विद्या नो स्मत्कृत्यनिवासे सेवा नित्यं कृष्णेनाद्याव
त्यं सेवा पापाविद्याकारतापघ्नी भवति धात्रे पापाविद्याकारतापघ्नीपताका य श्रीकृष्णेनाद्याप्रेय्य
माणा नित्यं सेवानन्यभक्तिः सा पापपङ्कः एवं तन्मूलमविद्याकारे ज्ञाननत्तु भयमपि नाशयाति नन्वेकं भगवद्गी
तायां भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतपेति अथानन्यभक्तिरेव
कृष्णसाक्षात्कारबीजमिति सदृष्टान्तमाह किंभूता सेवा पताका पताकेव पताका यथा गरुडलाञ्छना
किंभूता कृष्णध्वजपताका दृष्टमात्रे वक्तृ कृष्णोऽागत इति स्वस्वरूपानुसंधानेन साक्षात्कारं व्यनक्ति ॥ ॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

तद्धदनन्यभक्तिरूपीत्यर्थः अथमायापरात्मसमंतत्स्यात्तेनशक्नोमीतिस्वस्वरूपानुरूपंथानेनसाद्धा
त्कारइत्युक्तं ॥ तत्रात्मज्ञानेमहानायामः श्रीरामसेवयानविद्याशामिलयानत्कालेमुवाशाननिरामइ
तिविषमादरोपेंद्रवज्रयाह वोइत्यर्थेवासप्रमानधीरोयेनानिशंश्रीरामनेनामप्यमनेनादिश्रीरामनेनानि
मित्तभूतात्मध्यमध्येवभासमानेप्रपंचात्स्वअनेनादिनाशितत्सपवधीइत्यर्थः किंभूतात् श्रीरामनः
वशपवतीवरात् वशंनेनत्सममर्थेवशपत्रूपंनद्धतीज्ञानकीतस्यावराद्दीरित्यर्थः कस्मात्तेनुनिरोधीप्रमान्
मध्यंचिदचिद्ग्रंथिस्वरूपंमनः इतःप्रपंचात् द्वारावतीवशपवशंपनेयेत् वायुनिरोधीइंद्रियनिरोधीवा

श्रीरामनेनामध्यमनेनादिपेनधीरोनिशंवशपवतीवराद्धा द्वारावतीवशपवशंनिरोधीनयेदितो
प्रमान्द्वारावत्यावशपस्तत्रासक्तःकस्मात्तत्रवशंनयेत् योगेनवैराग्येण मध्यमनेनामरामश्रीः ५॥
चवाचित्तंनिरुध्यश्रीकृस्नपववशंनयेदित्यर्थः तेनकिंभवतीत्याह अतःअस्मादुपायात् श्रीमोदल
ल्मीरमरास्थिराभवति असत्यानिरोधवानपिविघ्नैरभिभूयतइत्यर्थः उक्तंच तथानेनमाधवताव
काःकाचिद्दुश्यान्तिमात्मयोइत्यादि ५॥ अथकथाप्रसंगः तत्रविश्वामित्रःस्वयज्ञसंरक्षणार्थंरामं
याचितुंदशरथंप्रसगादितिविषमादरयारथोद्धतयाह यःस्वरक्षतीद्धितनयस्वकौशिकेप्रदात्द्द
रेषुसर्वभूतेषुव्रतमभीप्सितपूरणायस्यतथाविधोदशरथःसद्वयोस्तनययोःसमाहारोद्धितनयंतदेव

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

श्री· रा· ध ४

संवधनं कौशिके विश्वामित्रे दातदत्तवान् ननु प्राणादपि प्रियतमं पुत्रं रामं कथं विश्वामित्राय केन निबंधे
न दत्तमित्याह भूते कौशिके त्रितपसि त्रिप्रकारं त्रिगुणात्मकं प्रसादं देहोभसमर्थं तपो यस्यासौ त्रितपा
स्तस्मिन् त्रितपसि किंभूतं हितं तनयं स्वं आनंदयितारं वियोगादित्यर्थः कृष्णपक्षे तु श्री कृष्णः परीक्षितं प्रति
वदन् माणिक्यकस्य कथां दृशमनुवदति भो आस्वयनः आसमंतात् दृष्टस्य यस्य गतिः परमार्थरतिर्यस्य तथा
विधपरीक्षित् तनतं हितं कृष्णस्य लीलां सदा स्मरत पूतना ख्यातया पततो त्रिके शिके पतत्री पक्षी वकासुरः केशी हयरू
पो दैत्यस्तयोः कुः पार्थिवं शरीरं तस्मिन् आदयितारं आसमंतात् दयालु पायस्मतथा पूतना वक केशी श

कौशिके त्रितपसि त्वरत्रतो योददाहिततनयस्वमानुरं रं तमास्वयनत हि परदयानीत्व रक्षसि पतत्रिके
शिको ६। लंबाधरो हत्रयलंवनाम्नो तं याहि याहि त्वरमागता ज्ञातागमा सहितादिया हि याहि यानं मेना
वलयत्रहेरायवालं ७॥

रोगाणिक्य पयैवाताय यस्यर्थः किंकर्तव्यं रतं क्रीडितं क्रीडनशीलेनेत्यर्थः ८॥ अथ विश्वामित्रेण रामं प्रस्थि-
तमाकर्ण्य रम्भत्सा ताटकां प्रेरयामासेत्याह भो लंबाधरोत्तरं दत्तं याहि स्वपरस्य ऊहत्त्वाधरो ऽर्वः लंबा
धरो ऽर्वो यस्याः सा तथा तस्याः संबोधनं किंभूते त्रयलंवनाम्ने त्रयेलोकत्रये लंबा नासा नासिका यस्याः सा तथा
विधे तत्तरं नाशयो गंयमानुषे देहं रामं प्रति याहि याहि आद्देवी सेतिद्धिरुक्तिः किंभूतां त्वं आगता आगता
प्राप्ता रावणानुज्ञा यया सा तथा अथ कृष्णपक्षे तु श्रीकृष्णं गोकुले स्थितमाकर्ण्य कंसः पूतनामाज्ञापयति
त्वं तत्र याहि वेलं पुरुषार्थं रदस्व अथ तत्र कुचेनाद्भुतं येन बालं हरो पहने न स्वामिना नंदेन सह वर्तमानासि

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

अथ ताटकया समं सूर्पनखापि समागतेत्याह । लंकायनानया सार्द्धं नित्यं गमाभूत् लंकायामयनं गति
क२ र्यस्याः सा सूर्पनखा तया ताटकया सार्कं नित्यगमाभूत् नित्यं गच्छतीति नित्यगमा पर्यटनासक्ताभूदित्यर्थः
किंभूता अनुत्रयमानुकारा अनुत्रः प्रेरितः अनुत्रः स्वतः प्रवृत्तः एवंविधो यो यमः कृतांतः तद्वदनुकारो यस्याः
सा तथा निःकृपेत्यर्थः कृष्णपक्षे तु शशवाथमागत्य कालं निनायेति शवप्रियाः शावाः क्रव्यादाः तेषु प्रथमा
बालघातिनी पूतनाम्नागत्य गोकुलं प्राप्य कालं स्वग्रासकं कंसनिनाय प्राप्तवतीत्यन्तरा तस्मीगोकुलागत
त६ गेतात्र त्रपेः पूर्वं किमत्र निषेधितेत्युक्त्याह । यद्येता एकानुमारका पूर्णमासीतया नु मीयते सा तथा
प्रथमेता एका वदतिहंददरूपं कृतवतीत दृष्टिप्ये न केनापि गेहं नर्गमेनना दिल्मा नैतोत नविति
लंकायनानित्यगमा यवाशा सा कंतया अनुत्रयमानुकारा एकानुमा यत्नानु पातकं साशावाथ
मागत्य निनाय कालं ।८। गाधिजाध्वरवैरायेतेतीनारक्षसा मता नाम साक्षरनानीतेयेरावै
निर्धारणेयातकंसा यातोत्पूरितः कंसोयस्याः सा तथा पुनः कंसेन न दृष्टा हे रघ्वेजाधिगाः ॥९॥
स्वग्रस्ता सती विपन्नेत्यर्थः ९ अथ विश्वामित्रस्य यागवध्वंसमनुष्टुभाह ॥ गाधिजो विश्वामित्रस्तस्याध्वरे
यागः तत्र वैरं येषां तेषु खरदूषणादयस्तेषु अतीनारसिगणे हताः सन्तो देहादिप्रपंचमतिक्रम्यगता इत्यर्थः रक्ष
सागणे वेगात नमताः हं मताः तत्सुमाजप्रसिद्धाः कृष्णपक्षे तु पूतनावधमाकर्ण्य कंसेनान्ये च तृणावर्ता
दयः प्रेषिता इत्याह । नाम साक्षरनातीतेक्कप्तसतियेरावैः प्रेषिता दैत्या हता अधजाधिगाग्रासन्नाम सा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

श्री· हुंकारेणसमंतात् उत्पन्नायात्वरताप्रपंचात्मकतांततोप्युत्तीर्णेपरब्रह्मस्वरूपेहंक्षेमसतीयेदेशायांवैःकं

रा. सानिर्देशशद्भैरगतानुरूपव्रजाधिगाः गोकुलमार्गयानेजातोयश्चाधिर्मानसोमध्यातांगच्छंतःश्रमाःअहो

गोकुलंगत्वाप्रपंचातीतेहंक्षेमस्माभिः किंकृतंवेषंकृतनावन्मनस्यमेवेतिपर्यायोकुलंचिंताश्रासक्तित्यर्थः १॥

५ अथमुनिभिःकेवलंरामार्पणेनेनकृतस्ययागस्यप्रशंसामाह देवेशच्युतनाथेत्याहकृपाप्रीतितस्तावद्देव

5 संभवतियावद्योगेअवासनायागेक्रियमाणेअवासनास्वर्गादिभोगप्राप्तयेयच्छाराहित्येनतस्मात्

तावद्देवस्याद्देवयागेयावद्वासना
नासवादेवयागेयावेद्याद्देवदेवता १॥

लराहित्येनयोयोगः सरामप्रीतयेभवतीत्यर्थः कृष्णपक्षेनकृष्णसेपरब्रह्मतामथारयत्नोद्देश्याःअन

रमर्षचक्रुरित्याह यायाद्देवदेवताकृष्णमूर्तिर्वेदेगेयावेदेउपनिषद्धिभागेगानंनिरूपयितुंयोग्या

ननुसाक्षात्कर्तुंअश्वमेधाद्येननिरूपयितुंनशक्यतेइत्याह नामवादितिअस्मत्संबंध्यासर्वप्राणात्मकं

शरीरंअवेतिउपसर्गः अवलक्षणार्थद्योतकः तथाचावलक्षणात्मनुष्यदेहात्त्वनिरूपयितुंशक्यते

एवंप्रथमंतस्यनिरूपणासंभवेनस्पृहननमस्माभिरसंभावितमेवेत्यर्थः २॥

५

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

अथस्वयंवरदर्शनार्थंकौशिकेनसहजनकगृहंप्रतिगतोरामस्तत्रकिंकृतवानित्याह अये
श्रोतः अनेनरामेणसभासुशिलाशैः सहचापंभग्नंसभासुराजसभासुशिलावद्धाजानकीवि
षयिण्योआशायेषांतेशिलाशाः राजानस्तैः सहचापंभग्नंनकेवलंचापंभग्नमपितुराजानोपि
भग्नाभग्नमनोरथाः कृताइत्यर्थः ननुईश्वरस्यधनुरितिज्ञात्वापिकथंभग्नमित्यत्राहकीनाश न ४
तानद्धरुषाप्राचीनवैरेणानुबंधनिमित्तेनकीनाशस्वभावः कीनाशतायमस्तद्रूपतातया

सभास्वेयभग्नमनेनचापंकीनाशतानद्धरुषाशिलाशैः शैलाशिषारुद्धनना
शनाकीपंचाननेभग्नभयेस्वभासः ११

नद्धः अतिनिविष्टोयोरावणस्तस्यरुषाकोपेनप्राचीनवैरेणानुबंधनिमित्तेन अथवापूर्वधनु
रुद्धंतंप्रवृत्तोरावणस्ततः परंतुनहतनइतिरुषाकोपेनवेत्यर्थः कृतस्यपत्तेनगोवर्द्धनोद्धरणेइंद्रो
लाद्वंवप्राप्तइत्याह पंचाननेनृसिंहेकृतस्वेस्वभासः स्वप्रतापात् भग्नभयेयतिः शंकनयायांगंकार
यितप्रवृत्तेसतिशैलाशिषारुद्धननाशनाकीदृष्टः शैलस्यगोवर्द्धनस्याशिषाभीष्टधरणेनरु
द्धोरोधंप्रापितः अनपवननाभग्नाआशाहविर्ग्रहणेछायस्यतथाविधेनाकीस्वर्गाधिपइंद्रोभूदि

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

श्री॰ अथ स्वयंवरार्थमागतानां राज्ञामज्ञानं वर्णयन्नाह याम् उत्तरभामसीतां लोका न विदुः अ
ए॰ त्तरमविच्युतंभामभागंयस्यास्तांसाचासौसीताचतांनजानातीत्यर्थः यतः अविवादे विष्णु
६ जितेकातारकाविष्णुनारामचंद्रेणजितेविष्णुजितंतस्मिन्विष्णुजितेअविवादेसर्वसंमते
6 सतिकातारकातारकाचकाशोभातितारकासंयोगस्तुचंद्रेणविनान्येनसहनभवतिप्रकृते

नवेद्यामुत्तरभामसीतांकातारकाविष्णुजितेविवादे देवावितेजिष्णुविकारताका
तांसीमभारत्नमयादेवेन १२॥

रामचंद्रेणसहसीतैवप्राप्तुमर्हति नान्येनेत्यर्थः कृष्णपक्षेतुगोकुलोपविष्टव्यस्पंदस्य
किंचलतीत्याह सीमभारत्नमयादेवेनदेवावितेजिष्णुविकारताकातांनवेत्तीत्यध्याहारः
सीमभारः २ सीम्नोभारःसीमगिरिमर्यादातस्याभारत्नमस्याःसौयादवश्रेष्ठस्तेनदेवशाकाश्रवितेरक्षितेगो
कुलेजिष्णोरिंद्रस्यशिलावर्षादिविकारताकानकापीत्यर्थः १२॥

६

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

८ दयः तेषामार्यः श्रेष्ठः सूर्यवंशालंकरणरामः वैदेहीमनसो मतः ज्ञानवयो मनः एवं कं हृतः न तु धनुः ॥ २

अथ यन्नुषिभिन्नस्मृतिज्ञानकाणमोहृत इत्याह अनुष्टभा तीव्रा गावः किरणा यस्य एवंविध
स्य तीव्रगोः सूर्यस्यान्वयं त्रायते अन्वयत्राः सूर्यवंशाभिमानरक्षकादिलीपार्थणां वंधेनेत्यर्थः
कृष्णपक्षे तु ब्रह्मसत्त्वं प्रतिगतः कृष्णस्नेहेन मानित इत्याह अत्रायन्वरगोव्रती अत्र व्रज्यसेत्र अ
यन्त्रामः वरभागशालिनो गावः तापव व्रतं पालयत्वेनोपस्थितं यस्या सो व्रती कृष्णस्तमसो
स्नानान्नमानित इत्यध्याहारः १२ अथ ज्ञानवत्याः पारमार्थिकं रूपं वर्णयन्नाह साधारामा

तीव्रगोरन्वयत्राण्यो वैदेहीमनसो मतः तमसोनमहीदेवैर्योत्रायन्वरगोव्रती १३
वेदव्यापदस्य सदनं साधारो वनतारमा मारतानवराधामानंदसह्यपयादेव १४

वनतारस्याधारेण विष्णुनासहमालक्ष्मीरवनारं वक्रेसाकायापदस्य सदनं वेदपदस्य मेवसदनम
धिवासस्थानं वेदज्ञातवती अनेन लक्ष्म्याः शरणावतारत्वं सूचितं अथवा पदस्य विष्णोश्चरणक
मलं तदेव सदनं विश्रामस्थलं जानती कृष्णपक्षे तु कापि गोपीनं दं प्रतिराधायाः प्रेमरूपं वदति
भो सह्यपरह्यपीशानंदसानवराधामेतिनच्छहृाद्दिदिनहृतां नेति सूचितं नध्यायादवेहृकसेमा
रतामदनरूपतस्येवं समाचारोस्ति अनेन कृष्णवयः संधिवर्णितो भवति १४ ॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

श्री॰ अथैश्वरस्य धनुर्भंगमाकर्ण्य परशुरामोभ्यगादित्याह यः सशैवनोद्धननेनेयोधीत्यपस्यागतस्य
रा॰ दशरथस्यात्मवो यस्मात्मन्त्यपोत्सवो रामः शैवतः शिवस्य धनुःपातीशैवः परशुरामस्तस्मात्कै
८ वतः द्धननेनकोपाविर्भावेपि अरोधीन रोधनं प्राप्तवान् अकुण्ठितशक्तिरित्यर्थः विमानस्थिते
7 षु देवेषु पश्यत्सु कृत्स्नपः अथकृत्स्नदेविरूपं येन कवंधवाद यः वेदत्रिवेदप्रतिपादितो
त्रिमत्ष्ववत्सपोभूत् अनेन वत्सपेन कृत्स्नेनधीरो येनकः अवशेरसाध्येस्तज्ञातीयैरत्येः स

शैवेनोद्धननेनेधीरो यो देवषुत्यपोत्सवः वत्सपोत्त्षुवेदयाधीरोनेनद्धतोवशेः १५
नगोपगोसित्वरेमपिनाकेनायोजनं धर्मधनेन दानं नंदाननेधर्मधनंजयेनानाकेनापि
मेरत्तसिगोपगोनः १६

हमाविनइत्यर्थः १५ अथपरशुरामो रामंप्रतिसक्रोधं वदति भोत्वर
नश्वरे मपिनाके पितं वनगोपगोसि यद्यपि त्वयाजीर्णधनुर्भग्नं तथापिमदानीते धनुषि नगस्यप
वतस्योपसमीपगच्छतीति नगोपगः पाषाणास्तन्तुल्योसि मदीयधनुषोतिगुरुत्वेन निश्चेष्टोभव
सीत्यर्थः एवमेतादृशेनत्वयि जनकेनयत्कन्यादानं कृतं तदपि अयुक्तमित्याह धर्मधनेनकन्याल
क्षणेनाजनयद्दानं न सम्यक्नायः जनोदानपात्रं एवमदानपात्रे त्वयि यद्दानं कृतं न सम्यक्नायः नयोनी
तिः तत्संबंधी नायः नन्नायः अन्नायः अनीतिरित्यर्थः कृत्स्नपदे दैत्यवंधदृष्टानेरः कृत्स्नलोति॥ ८

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

हे कृष्ण त्वं नंदानेने नाम्नासि नंदपदानंतेमस्म्योयस्मिन् तन्नन्दानंदं गोकुलं तस्मिन्नाप्तहर्षः पर
मात्मासि बालकत्वात् अत एव धर्मपथं न जन्मानंतरीयपथैरर्जितं धर्मपथं न नथानः अस्माकं जयोपि
त्वमेवासि केनापि हृष्ट न विपाकेन गोपगः गोपविशेषेणावर्तमानः सन् मे इति मां रक्षसि १६ ॥
अथ रामे राज्याधिकारिणि दृष्ट्वा कैकेयी सापत्न्यभावमदर्शयदित्याह आमस्तनं सुंदराज्ञीय
यद्रामं ततान आमःस्तनः शोक्षीयस्याः सा आमस्तना अपरिपक्ववचना तथाविधा सुंदराज्ञी कैके
वं ध६ यी पदाय राज्यप्राप्तये रामं निष्कारणं ततान विस्तारयामास स्वपुत्राय राज्यं देयमिति दशरथा

ततान दामप्रमदापदाय नेमे रुचा मस्तनसुंदराज्ञी नीराद्दहं न स्वमवाहमेनं पदापदाम
पतिर्वबंध चकोरित्यर्थः आमस्तेनेति पदं नेनेदं मात्कृत्यमिति सूचितं अथ कथं प्रमदा न तातः
ततानेत्याह रुचा इमे न रुचा दीप्त्या इमे रामादयः पदयोगम्या न भवंतीति अथ तस्याः किं लौकिके
भयं नासीदित्याह प्रमदेति प्रकृष्टो मदो गर्वो यस्याः सा तथा कृष्णपदेन कदापि क्षेमं न दुर्गम्यभाडे
भयेन दुर्गम्यनाशे च जाते मननियशोदाया विषादोभूत् इत्याह प्रमदा यशोदा दीरात्मकाशाद्दह्यप्राण
मपि स्वकीयं न मेने यथा दीरेममतानथाप्रणोनाभूदित्यर्थः अथ कृष्णबंधनार्थं यद्दामम्राप
प्रापनत्त्वाह कार्यदामं न भवतीति मेने अतः दामपूरणहेतोरभावाद्दामनिष्प्राणाभूदित्यर्थः १७ ॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

श्री॰ रा॰ ८ अथवनवासार्थंरामेप्रस्थितेसतिअहल्योद्धरणप्रसंगमाह मत्तसुत्रामाजारइतः प्राप्तः मत्तः
काममोहितः इन्द्रस्तांप्रसिद्धामहल्यांप्रतिगतः तथापिससुत्रामाशापाद्विगानतामितः
गौतमकृताच्छापाद्विगानतांसहस्रभगादिलक्षणांप्राप्तः कृष्णपक्षेतुपूर्वश्लोकेकृष्णो
यशोदयादाम्नाबद्धइतिनिरूपितं अथयमलार्जुनोन्मूलनप्रसंगमाह तामवस्थामनु

तामितोमत्तसुत्रामाशापादेषविगानतां तांनगाविषदेपाशामात्रा
सुतमितोमिता १८

भूयनगाविषदेकृष्णेसतियशोदामाज्ञासुआशानयोस्तमतः पिताभूत्नगच्छतः इतिन
गौस्थापितौवृक्षौयमलार्जुनौताभ्यां अविषं [illegible] अमृतमोदलत्वेदेकृष्णेसतियशोदामा
त्रासदधितुग्ध्यादिविषयेषुअपाशाअतिबंध्यासतीउत्तमतः अलौकिककर्मकर्तुः
कृष्णात्मितान्याममर्यादाअभूत् १८

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

अथसूर्पनखी: श्रातायानामाहं कृतंतंकृतमिति शालिनीछंदसाह सूर्पनखीतावत्
नासावध्यापत्रपास्ति नासानासिकातस्याश्रवंध्यविगानंछेदलक्षणंतत्रापत्रपानिर्ल
स्म३ ज्जास्ति लक्ष्मणाल्लुञ्चाज्ञाविनोदी आज्ञयाश्रीरामाज्ञयाविनोदोस्यास्तीतिसतथा धीरोदा
त्तःश्रीरामस्तुनुत्वासूर्पनखीकृतयास्तुत्याउपालंभेनविगीत्वाअकीर्त्तिख्यापनेनसस्मि न
तोभूत् कृतसपद्देननारदशापादुन्मोचिताभ्यांकुबेरपुत्राभ्यांस्तुतःश्रीकृष्णःनोप्रतिस्वत्

नासावध्यापत्रपाज्ञाविनोदीधीरोनुत्वासस्मितोयोविगीत्वा त्यागीविद्यातो
स्मिसत्यानुरोधीदीनोविज्ञापात्रपद्यावसाना १९॥

यमाह अहंविद्यातोज्ञानस्यत्यागीज्ञानप्रदोस्मितथासत्यानुरोधीसत्यंपरंब्रह्मतत्रानुरो
धोत्याशक्तिर्यस्यसतथा तथालोकस्तुदीनःविषयसुखासक्तोस्तिअविज्ञाअविद्यापात्रपद्या
त्रावसाना पात्रंज्ञानपात्रंमद्भक्तस्यपद्यापद्धतिर्ज्ञानमार्गनिष्ठत्वं तेनैवावसानंनाशोयस्याः
सातथाएवंसतिशापान्मुक्तिःकृतेत्यर्थः १९॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

श्री॰ भिक्षुः संभावितमगारमगात् भिक्षुरूपधरो रावणः संभावितं पूर्वं निर्णायकत्वेन ज्ञातं आगा
रा॰ रं पंचवटीस्थमगात् ततः स्वनघाजवंशः पातनाधिः सन् आप सुतरामनघः स्वनघः निःपाप
९ एवंविधः अजवंशो रावणः पातो गतः आधिः चिंता यस्य स तथा जानकीं दृष्ट्वा निश्चिंतः आप जानकीप्रा
७ प्तिः पापवंशोत्पन्नोप्येतादृशं निंद्यं कर्माकरोदित्याश्चर्यमिति सूचितं क्रमस्य पदेन पूर्वापेक्षा

संभावितं भिक्षुरगादगारं याताधिरापस्वनघाजवंशः शावं जघान स्वपराधिताया
रंगादगारस्तुमितं विभामं २॥

नः क्रमः रङ्गात् रङ्गस्थानात्मकाशनात् वंशमैतया पूर्वमेव गतप्राणं कं सं जघान किंभूतं अ व ५
ग्रहे एव ४ गारस्तु भितं सक्रायं एष चाणरः यथा तौ क्रमः वहिः कथं न निःसार्यते इति किंभूतं विभासवि
च्छायं सद्योमृतत्वचिह्नयुतं अथ कस्माद्धेतोर्जघान तत आह स्वपराधितायाः अपराधितो भावो
१ अपराधिता सुतरामपराधिता स्वपराधिता तस्याः ज्ञत्वा यायिं निर्बंधाग्रजदननमूतनादिकूटरच ८
नादयो ये अपराधास्तत्कर्तृकत्वादित्यर्थः २॥ ट

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

अथमृगयापराहृतस्यरामस्यजानकीमपश्यतोनिर्वेदमाह तयामागतंतयाज्ञा
नकीमाइतिधिक् मृषैवगतंनिष्क्रांतं अथमास्वतोगताकिंतुबलात्कारेणात्य

तयातितारस्वनयागतंर्मया लोकापवादद्वि
तयंपिनाके केनापियंतद्विद्वापकालोमातं
गयानस्वरतानियातः २९

तथा तत्राह किंभूतयाअतितारस्वनयाउच्चैराक्रोशमानयाएवंतस्यांगतायांपिनाकेलो
कापवादद्वितयंजातंपिनाकेपुरुषार्थाधिष्ठानेलोकापवादद्वितयंअनेनमृगपृ
ष्ठतोधावनेस्त्रीहानिश्चेत्यपवादद्वयंजातमित्यर्थः २९

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

रा. कृष्णपक्षेतनकंसहननात्पूर्वरागमाह यं कंसं केनापि प्रकारेण कालः अवापकालः
कृतान्तोयमः कृष्णः ननु परब्रह्मस्वरूपस्य कृष्णस्य कंसे द्वेषः कथमित्याह किंभूतःकालः

१०

शैवेविदाचित्रकुरंगमालापंचावटीनर्मनिवेशे
चेतेवा वीतेचैरानर्मनटीवचापलामागरं
कुत्रचिद्दाविवेश ॥२२॥

तद्वित् तद्रूपस्थितं कंसनिधनं वेत्तीति तद्वित् अथ सकः प्रकारस्तमाह किंभूतःकालः
मातंगयानस्वरमातिष्ठातः मातंगः कुवलयापीडस्तस्य प्राणधावनं स्वरश्चेतद्याक्रोशात्
मतिलङ्घयातः कुवलयापीडं क्रोशन्तं मारयित्वा रङ्गगतइत्यर्थः २२

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

अथरामस्यपुनर्जानकीप्रतिनिर्वेदोक्तिमाह रामःभोजानकि अविदा अज्ञातेनमयासद्रूपं
चवटीनमेनरोचतेतत्वयेनत्वंगतेत्यर्थः अथतद्देवाज्ञानप्रकटयन्नाह शैवेशवप्रियेराददसे
चित्रकुरंगमालास्तीतिमायामृगमजानतामयेत्यर्थः हृत्स्मपद्देनहृत्स्मस्यसामर्थ्यकंसहनना
त्पूर्वमेवप्रकटीभूतमित्याह यःवातेवातद्रूपेत्दणावर्त्तेअचरःअचलोभूत् तथालामागरंकुत्र
चिदाविवेशनद्धोस्म अनेनवाल्यपताविंतेपुरुषार्थंकृतवान् किंपुनर्यौवनइतिसूचितं एवमे
तदुभयंसदृष्टांतमाह नटीचापमिवनटीनर्त्तकीचापंभ्रूभंगमात्रंदर्शयतितद्वदित्यर्थः २२

नेह्वादयसिपद्विकंधरामालिनीस्वमतमंतहूयते तेयहन्नमतमःस्वनीलिमा
राधकंद्दिपमिपद्धवाहने २३॥

अथजानकीस्कंधेगृहीतामत्वं निर्गतस्यरावणस्यमार्गे
जटायुनामाकंसंगोभूदितिरथोद्धयाह जटायुःरावणंप्रतिवदतिभोस्वमतमत्त उद्येमालिनी
हूयते स्वमते स्वाग्रहेस्तेनमत्त उन्मत्तस्वाग्रहमेवकरोषिपरकीयविचारंनशृणोषि असावधा
नत्वादित्यर्थः मालिनीमतिःसुकुमाराजानकीहूयते लोकेयंप्राप्नोति किंविधायद्विकंधरापद्वि

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

श्री॰ णित्वयिपातिनिमयिकंशरणमन्यायान्तंपरिभ्रमशान्तंअत्रमहाक्लेशः प्राप्तावपिसततंरणरणकवेदनास

रा॰ विवेकेनलक्ष्मणाकृतमांत्वनेषुक्लेशेषुजातेषुसत्स्वपिरणरणकगतावानरास्त्रविरोधिनोमित्राणि

११ यस्यसतथा स्त्रीविरहवेदनासङ्कुलतासवानरैःसहसम्बन्धयज्ञातंतेनविश्रान्तिरभूदित्यर्थः कृष्ण स्वं ३

॥ पक्षेतुकृष्णेगोकुलंविहायमथुरांगतेसति विरहखिन्नागोप्यामिथःप्रोचुरित्याह अथभोअग

णयपरतेधीरःवञ्चयिता रइतिमृषागणयितंसंभावयितुं [illegible] योगंयगणयंनगणपमगणय

किंनतोयरसायपानसेवानियतेनवै वैनतेयनिवासेनपापंस्मारयतोनकिम् २४

तुं अश्लाघ्यकुकुपासहदं सुरंतंतत्रधीरः निर्लज्जप्रवृत्तः कृष्णः वःयुष्माकंअवंचिता ॥ अथस्वविश्ले जा६

केचअनुवेदनास्विति पदेनसहेति विरहदुःखकथनेवेदनेत्याह पंपातोयरसानकिंनतोये

रसःस्वादुतायस्याः तथापंपाकिंनास्तिअस्त्येवेत्यर्थः तथानियतेननितरांश्रयेननियमवतासे

वानास्तिअस्त्येवेति एवमुभयथास्यविश्रान्तिर्विरहदुःखदास्तीत्यर्थः कृष्णपक्षेतुगोप्यःउद्धवं

परिहसन्तिवैनतेयनिवासेनपापंस्मारयतोदूरीकुर्वतःपुरुषस्यकिमुवाच्यमित्यध्याहारः कृ

ष्णोपासयानिःपापस्त्वंकिमस्मान्नप्रसादयसीतिसूचितं ।२४। ॥

न१

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

अथवालिनाहृतदारःसुग्रीवोरामंप्रतिशरणंप्रयातइत्याह सनतानतपहारामःतेनस्वतेतेन

व: नतस्यनम्रतांगतस्यातपहन्त्रीतितथाविधोरामःशेनसहखेनस्वतेनेआश्वासजनितेनसुखेन

स्वकीयंसुग्रीवंतेनेविस्तारितवान् सेनाधिकारंदत्वाप्रसिद्धं कृतवानित्यर्थः किंभूतंअविहि

तागमंनाविहितःसम्पादितःआगःअपराधोयेनतथानिरपराधिनंपिहृतनार्ग्यमित्यर्थःकुस

पदेतन्उद्धंगोपिकाःप्रतिकूलस्यस्याश्रितपक्षपातंवदति सनेतानियंताकृष्णःइदंसरस्वतीतीर

स्थंनंदंसंकटेआपप्रापतथाहिसंगताहिविनाशस्वंजनेनतानसंगतःप्राप्तायाहिःसर्पस्तस्य

सनतानतपहातेनेस्वशेनाविहितागसम् संगताहिविनाशस्वनेनेहापततानसः २५

कपितालविभागेनयोषादोनेनयेनसः सनयेननुदोषायोनेगभाविलतापिकः २६

विनाशकृतेसतिस्वस्वकीयंजनंगोकुलेस्थितंततानविस्तारयामास नंदनिधनशंकयामुमु

क्षुविस्तारितवान् सकिंभवतीतिनिरूपयिष्यतीतिसूचितं अथवालिनंहत्वासुग्रीवपत्नी

ममोचयदित्याह सरामःअनुनयेनप्रीत्याकपितालविभागेनयोषादोभूत् कपिर्वालीताला

अतद्दत्ताकालेषांविभागेनविच्छेदनेनयोषांददातीतियोषादःयोषांसुग्रीवपत्नींदत्तवान्

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

श्री॰ कुसुमपत्रेतुगोपिकाः वदंतिकुसुमः नेष्यतीतिमार्गेनास्ति ननु इतिवितर्केदोषायोस्तिदोषाणां

रा॰ दुःखानामायः प्राप्तिर्यस्मात्तत्तथाभुतनरायास्यतीतिचेन्न नगेभाविततापिकः नगोपर्वतेभावि

नीपालनावल्लीसहकारशाखावातत्रपिकः पिकतुल्यः यथायमसंभावितोर्थस्तद्वदित्यर्थः २६

१२ अथ्यागदः रामंप्रतिवदति भोरामतेसभाप्रकपिवर्णमालिकास्तिप्रकृष्टायेकपयोवानराः

12 तेषांयेविचित्रवर्णास्तेषांमालायस्यांसातथानानाविधवानरश्रेणीसंपन्नासातथ्यकल्पप्रसरं

तेसभाप्रकपिवर्णमालिकानाल्पकुप्रसरमभ्रकल्पिता तालिपिकभ्रमरसप्रकल्प
नाकोलिमार्णवपिकप्रभासते २७

यथाभवतितथाऽल्पंसल्पोकः पंरेतुअभ्रकल्पितानास्तिअभ्रआकाशेमेघमंडलपर्यंतवानास्ति

ता अनेनरक्षः पंक्तिस्तुआकाशकल्पितनास्तिइत्यर्थः कुसुमपत्रेतुगोपिकास्तावदन्यापदेशेनपिकं

प्रतिवदंति भोकालिमार्णवमालिन्यसमुद्रकोकिलतेतालिपिकभ्रमरसप्रकल्पनाप्रभासतेतल्प

भवतालिपिकंसरंतत्तस्यभ्रमः तन्नयोरसः सप्रभासतेप्राप्तसरतभ्रमयावान्नमः ननुसादानाश्रमव

सरतसहवितवहसप्रेपिदुर्लभमित्यर्थः २८॥ १२

अथरावणोयद्यपिसकलसैन्यसन्नाहवानस्तितथापियस्मिन्वीरत्वेरोणानास्तीत्याह अक्र
मात्वंयथाभवतितथारावणोद्विपतनत्रयानेतेअल्पकभ्रमणंनभविष्यति नक्रमःअक्रमः
परस्त्रीहरणादिकः तेनात्वंयथास्यात्तथाअद्विपतनेरामस्यदृष्टिपातेसतिनपात्रपालज्ञानतया
रावणेनमैत्रसतिपर्याकुलतयाल्पकल्पकंयद्भ्रमणंचित्तभ्रमः नभविष्यतिकिंतुभूयात्‌चित्त
भ्रमोभविष्यतीतिअहोवीरप्रकृतस्यपापंकल्पयेतोममजयोनास्त्येवेतिलज्जयाहतताचित्त

रावणोद्विपतनत्रपानेतेनाल्पकभ्रमणमक्रमात्वंरंतमाक्रमणमभ्रक
ल्पनातेनपात्रनतपद्दिशोवरा २८॥

स्यैकभावस्यानंतनभविष्यतीत्यर्थः कृष्णपदेतुउद्धवः गोपिकाः प्रतिवदन्ति भोगोप्यः तेना
क्रमणेदैत्यानिवर्हणादिकंतृष्णाभ्रकल्पनामेघश्यामतावारंक्रीडामवलंवितानस्यानकि
मपिप्रयोजनंतेनकारणेनस्मामेघश्यामतापात्रनतपद्दिणोवराःपात्रेनताः पात्रनताः पुरुषा
स्तेषांपद्दिशोऽयस्यसनतपद्दीनसैन्हृत्सायवराकुलिताभक्तानांध्यानगोचरतोपेत्यर्थः तथा
चभवतीनांध्यानयोगेनेवकृतार्थत्वंजातमस्मीतिसूचितम्॥ २८

॰दैवेयोगे सेवादानं शंकायाने लंकायाने॥ नेयाकालं नेयाकाशं नंदावासे गेयोवेदैः॥२४॥ ॰ ६

श्री॰ अथसीताशुद्ध्यर्थमादिष्टो हनुमान्रामं प्रति विद्युन्मालयाह अयेश्रीरामलंकायाने लंकाप्रति
रा॰ गमने शंकानास्ति यतो दैवयोगे मम सेवादानं जातमस्ति दैवसंबंधी दैवस्तस्मिन्दैवयोगे मया
१३ सेवालंविताऽस्ति अतो लंकागमने सेवा एवमित्यर्थः कस्यपेतनपुनरुद्भवः कस्मैलोतिसहकस्य:
13 नंदावासे नंदवने भूत् सकः येनाकाशं नेयाकालं नेतं संदर्तयोग्योनेयः आसमन्तात्कालोयेन
सह एवंविधमाकाशो कालाकाशादिकमपि मं हर्तं तमसस्तत्र भवती नांसमारभ्रमः कियानित्यर्थः

॰शंकावज्ञानुत्वनुज्ञावकाशंयानेनद्यामग्रमुद्यानेनेया यानेनद्यामग्रमुद्यानेनेयाशंकावज्ञा
नुत्वनुज्ञावकाशम् २५॥

अथजानकीशुद्धिं कृत्वा परावृत्तो हनुमान्रामं प्रति वदतीति सम्माद्यनरयाशालिन्याह याजानकीउ
ग्रमतिक्लेशं यथाभवति तथानद्याकुल्यायामुद्यानेनेया उद्याने क्रीडावनेनेतं योग्यानेया तथाच
सीता कृत्रिमसरिद्रूपकंठे उद्याने इत्युक्तं अथतं रावणस्य क्रीडावनं गंतुं कथमवकाशं लब्धवा
नित्यत आह यानेप्रयाणकालेऽनुज्ञावकाशं यथाभवति तथाहं शंकावज्ञानुत् श्रीमदनुज्ञा
वलं लब्धावकाशोतेन शंकावज्ञेनुदतीति तथाशंकारादसमभयं नतकर्तवज्ञाजम्बूकवनपालादि
कृता तदुभयमपि निराकृतमित्यर्थः ॥ कस्य॰

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

पद्मे गोकुलात् परावृत्त उद्धवः कृष्णं प्रतिवदति भो कृष्ण त्वद्ध्यानेनैव या कापि गोपी नन्दध्यानेन तिष्ठती
ति त्वया पूर्वं स्कंधे परिश्रुता ध्यानेन प्रतिया प्रापिता सा गोपी नन्दध्यायमुनोपकंठे उग्रमति निष्ठं रयथा
स्यात्तथा ध्यानेन लोकान्तरगमनेन सिद्धास्ति तर्हि तस्याः दम्पिते देवरादयः किं न संतीत्यत आह अहं पुनरा
गममिति श्रीमदनुज्ञया लब्धावकाशेय या स्यात्तथा दयितेदेवरादीनां शंका न तत्कृतमियमविग
णय्य प्राणावशेषा तिष्ठति एवं तयैकयान्याः सर्वाः अपि संबोधिता इत्युक्तं भवति ३० ॥ ॥

वायुजेनानुमतो निमेसं ग्रामे रविनोद्भवः बद्धितोविरमे ग्रामसेमेनेनो मनुजो युवा ३१ ॥

अथ समुद्रं नियम्य लंकां गतेऽपि शक्रोऽपि रामः स्तुत्वा नरकोत्तं कं दृष्टे सेतुवंधार्थं आदिदेशेत्याह वारं
पथवा सरामः यं कं चिद्धानरं पाथ्योपयनेसेतुवे दिदेश पाथसां समुद्रे कानां अयनं यस्मिन्स पाथोयनः
समुद्रस्तस्य सेतवे सेतुबंधाय दिदेश आज्ञापयामास यरंद्धि सीतापयथा भवति तथाहृयाः सीतया
समहारो हि सीतं तन्नस्पर्शयः प्राप्तिः किं पुनरेकसीतालब्धिः सीताद्वयलाभो भवितेत्युत्साहनादिदेशे
त्यर्थः कृष्णपक्षे तु कं से हते मातामहो उग्रसेनाय राज्यं दत्वा स्वयं तत्सेनापतिर्बभूवेत्याह सकृष्ण ः
यथायोग्यं एवं तत्सेनयना सीत उपायं राजनीतिमनतिक्रम्य वेतसेने वज्रधारके तेनयत्रासीत् विशेषे

श्री· रा· २४ 14

अथ रात्रौ सैः सह संग्रामोपस्थिते श्रीरामो हनुमत्प्रशंसामाह वहति युष्माकं मध्ये रवितः अ
ह्निवा संग्रामे वायुजो हनुमतः न रविर्यस्मिन्न रविस्तस्मिन्न रवावित्यर्थः तथा अह्नि दिवा वा
संग्रामे उपस्थिते हनुमानेव समतः रात्रौ दिवा वा मायाविभिः सह संग्रामे वायुपुत्र एव निर्वहि
ष्यतीत्युक्तं भवति कस्मात्प्रदेशनं केस्मादि हननेन राज्यस्थापनेन वा हनूमतस्य किंचित्त्वं वर्णनीयमित्याह
यः विरमे प्राप्ते सति वह्नितः ग्रामे समेने गोकुलस्य दावानलेन कृत्वा नाशे प्राप्ते वह्निनेव ग्रामे सम

त्रातायमायत्र रघोविंताप्रं कानुगानन्यवयोयनानि तिनाययोवनपनगानुकारं प्रता
त्रिज्योरत्रयमायतनाद्भः ॥३३॥

स्यां बनोपस्थिते मेनेश्वरतः श्रमनुजः देवः सन्नपि वापराक्रमीत
त्र न किमपि चित्रमित्यर्थः ३२ अथ रामरावणयोर्युद्धप्रसंगे वानरैर्व्याकुलीकृतो रावणः रामेण
सह योद्धुं न प्रभावमगादित्याह यत्रेति कानुगानन्यवयोपनानि तनत्रत्नाए रघोस्त्रातायमायेकमनुग
छतीति अंकानुगाः शरणागता वानरास्तेषु अनन्यवयो जन्म येषां ते अनन्यवयाः सः सुग्रीवहनुमदा
दयः तेषां अयनानि संग्रामे व्यूहप्रवेशपरिसरणानि यत्र रक्षता युगतार्थ दशास्यः रघोरामचंद्रस्य व
तायामेस्तु वातायमानस्य समर्थोभवत अथ मत्तो वानरैर्देवव्याकुलीकृतः सन् रामेण सह योद्धुमल

२४

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

कृष्णपक्षेण पूर्वं वृन्दावनादिक्रीडावनेषु कृष्णो दैत्यानवधीदित्युक्तं तत्र त्रयमतिभयानकं द्रष्ट
मित्याह यः आयतात्मः कृष्णः पुतनारिष्टोरघत्रयं निनाय पुतनायोगप्राप्ताश्चैतेरयश्चैतेषु घोरत्रयं
भयानकत्रयं निनाय शायितवान् पूतनाबकाघासुरः केशी चेति भयानकत्रयं स्वांतिके प्रापितमित्य
र्थः अथ भयानकत्वमेव व्यनक्ति किंभूतं घोरत्रयं वत्सनयानुकारं वेन भवावन्यादैत्याव्याघ्राद
यो वा तेषु नगा वत्सपर्वतवत् अनुकारो यस्य तत्तथा अतिप्रचंडमित्यर्थः २१ अथ सपरिवारस्य राव
णस्य तारकब्रह्मणि समावेशो भूदित्याह रिपुः श्रीहृच्चा तारके श्रापरिपुः रावणः श्रीहृच्चाश्री

तारके रिपुराय श्रीहृच्चादासमहनान्वितः तन्विनासहसदाचाहश्रीपरापुरिके रता २२

मोदलक्ष्मीः तस्या हृत्कहीभिः प्रकाशस्तेनेत्यर्थः किंभूतः दारसुतान्वितः दासाः कुंभकर्णादयः स ४
सुताः इंद्रजिदादयः ते सर्वे पि तारके प्रापुरित्यर्थः कृष्णपक्षेण सदाचाहयथा स्यात्तथा तन्विना
सहगोपीषु श्रीपरापुरिके परब्रह्मणि हृष्टेरतासीत् गोकुले कृष्णविरहेणाव्याकुलीताः सहगोपि
काः सह मथुरायां कृष्णस्य समेरध्यासाकं गार्हस्थ्यमभूदित्यर्थः २३

४ कैरतासीत् । तनुनाशरीरेणद्रुता सुगोपीषु प्राप्ता सुप्रियः परा द्वितीयाश्रीरिव सैरंध्री पुरि मथुरायां २

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

श्री. अथ रावणे सपरिवारे हते सति लंका दत्ताभूदिति विद्युन्मालयाह यानेरामागमने सति लंकारं

रा. कागाराध्यासं यथा भवति तथा मेयाभूत् इयं लंका उत कस्यचित् रंकस्य वागारं इति भ्रमे रागाज्ञा

ताभूदित्यर्थः कस्मिन्सति कारायासे सति कारावन्दीगेहे तस्या आसे विस्तारे सति विस्तारं तनिर्मि

१५ घवंदीकृतेषु देवेषु निर्मोचितेषु सत्स्वित्यर्थः कृत्स्नपदेन पूर्वं सैरंध्रा समं कृत्स्नस्य गार्हस्थ्य

15 मभूदित्युक्तं तत्र दृष्टान्तमाह सेव्या सेवितेयोग्यपाति रमणीया मेरंध्रीय सभोगावसरे कालमेघश्याम

लंकारं गाराध्यासं याने मेया कारायासे सेव्यारा कायो मेनेयासंध्यारागाकारं काले ३५

गोदावरी ब्रह्मगिरेः सकाशात्संप्रापिता प्रागुदधिं प्रयत्नात् येनर्षिणा सोपि पुनः प्रतीय

मानेन तमद्भाप्रभवेक्षिमेतान् ३६ एवं विलोमात्तरकाव्यकर्तुर्भूयात्समायात्समवेत्य तज्ज्ञाः

जानंतिमां चित्रकवित्वसीमां दैवज्ञसूर्याभिधसंदिदिष्टाम् ॥ इति श्रीमद्दैवज्ञपंडितरामकृ

कृत्स्नं प्रतिमेयाने तं योग्याभूत् अत्र योग्यपदेनोभयोः संयोगे शोभातिशयः सूचितः कामिव राकासं

ध्यारागाकारमिव पूर्णचंद्रोदयोपलक्षिता राका संध्यारागाकारं प्राप्य यथा शोभातिशयशालिनी

भवति तद्वदित्यर्थः ३५ इति श्रीमद्दैवज्ञपंडितसूर्यविरचितरामकृष्णाख्यकाव्यं समाप्तम्